शब्दकौस्तुभः

क्रम-संख्या १२५५१

ग्रन्थ-नाम शब्दकौस्तुभ

ग्रन्थकर्त्ता भट्टोजि दीक्षित

विषय व्याकरण

लिपि देवनागरी

पत्र-संख्या

पत्र-प्रमाण × मि० मि०

पंक्तियां

अक्षर

पाठ-संख्या

पूर्ण/अपूर्ण

प्रारम्भ :—

भीर भंजभगवानभंजराजा

शब्दकौस्तुभोदीक्षितनिर्म्मित:

विषयमिति विषये कथिते तस्मात् प्रयोजनमनुक्तमप्यायातमिति भावः प्रयोजनमोहितं कथयेत् तु-
तुचितं । विषयाकथनेन न्यूनत्वादिति दिक् ॥६॥ द्योतक इति इदं न साध्यं । अनर्थकानि निपातानामपि द-

शा० कौ० श्रीगणेशाय नमः ॥ विश्वेशं सच्चिदानंदं वंदेहं योखिलं जगत् । चरीकर्त्ति बरीभर्त्ति संज-
१ रीहर्त्ति लीलया ॥१॥ नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम् । श्रीभर्तृहरिमुख्यांश्च सिद्धा-
न्तस्थापकान्बुधान् ॥२॥ नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम् । फणिभाषितभाष्या-
ब्धेः शब्दकौस्तुभमुद्धरे ॥३॥ परिभाव्य बहून्ग्रंथान्योर्थः क्लेशेन लभ्यते । तमशेषमनायासादितो
ग्र गृह्णीत सज्जनाः ॥४॥ अर्प्ये लक्ष्मीरमणे भक्त्या श्रीशब्दकौस्तुभम् । भट्टोजिभट्टो जनुषः साफल्यं ल- म
ब्धुमीहते ॥५॥ प्रेक्षावत्प्रवृत्तये व्याकरणस्य विषयं भगवान्भाष्यकारः प्रादर्शयत् । अथ श-
ब्दानुशासनमिति । अथशब्दः प्रारंभस्य द्योतकः न तु वाचकः निपातत्वात् । उपसर्ग-
१२ वत् । न च तेपि वाचका एवेति वाच्यम् । उपास्यते गुरुरनुभूयते सुखमित्यादौ धातोः सकर्म-
कक्रियापरत्वं विना कर्मणि लकारयोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्य त

र्शनात् । किं तु वाचकत्वाभाव इति तदाह नवेति ॥ प्रकृते च शब्दानुशासनपदस्य लक्षणा । प्रादिसमभिव्याहारे जिधातोः प्र-
चेन वाचकपदसमभिव्या [illegible]

[illegible]

सामान्यप्रतीतव्याप्यधर्मोपस्थितौ व्यापकधर्मोपस्थितेरावश्यकत्वादिति भावः ०

स

वद्युक्तत्वात् ननूक्तयुक्त्या प्रस्तु पसर्गाणां द्योतकता निपातानां तदन्तु वाचकमेवेति चेत् न संक्षा
क्रियते नमस्क्रियते ऊरीक्रियते अलंक्रियते इत्यादौ कर्मणि लकारेण कर्मीभूतस्य
गुर्वादेरभिधानसिद्धये धात्वर्थं प्रति कर्मत्वस्यावश्यकत्वात् उपसर्गतापेक्षया निपातत्व
स्याधिकवृत्तितया तदवच्छेदेनैव द्योतकताकल्पनाच्च सामान्यप्रमाणानां पक्षपा
तात् निपातत्वं वा खंडोपाधिरूपं जातिरूपं वा स्वस्वरूपमेवेति पक्षत्रयेपि प्रादिचादि
साधारणमेव प्रत्वादि प्रत्येकपर्य्यवसन्नं तदिति पक्षेपि प्रादीनां चादिभ्यो वैलक्ष
ण्यानिरुक्तेः केवलानामप्रयोगेणानुपलभ्यमानत्वेन विजयतइत्यत्र धातोर्विशि
ष्टजयइव घटश्चेत्यत्र समुच्चितघटे घटशब्दस्यापि लक्षणायाः संभवात् किंच चा
ना दीनां वाचकत्वे समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इति व्युत्पत्तेर्निपातेन

अन्यपदविहितसं
चादीनां वाचकत्वे ह
स्यात् किंचेति

यथेति० भेदरः समुच्चयइदादौ० ननु चशब्दशक्तिस्वभावात्स्वतिपाक इत्यादेरिवचादिवाच्यस्यासत्वभूतत्वमिति नैवं प्रतिकूल्य
णं समुच्चिताभिधायी च्चन भेदनिबंधनषष्ठीनवाविशेषणयोगो नवाव्युत्पत्तिसंकोचोऽनन्याह० अपि चेति २ बोधकताप
ति अपिनासादृश्यस्यवार्थत्वेनामर्थयोरभेदान्वय इत्यस्य संग्रह सूर्यरश्मिसदृशैः

श० को० रविषकतयाविनाप्रमाणं संकोचनीयास्यात् स्याच्च समुच्चयादिशब्दयोगइवचादियो
२ गेपिघटादेःषष्ठी किंचसमुच्चयादिपदे रूपस्थिते यथाविशेषणसंबंधस्तथाचादिभि
रूपस्थितेपिस्यात् घोतकत्वपक्षेतुपदार्थेदेघात्वान्नात्तत्रविशेषणान्वयः अपिचशा के
कालिदास ह्ते ८ दैकत्वेरिवादौव्यानुत्क्रदिस्यन्मानिवेत्यादौउत्तरेदृक्षौः शदेरसदशानुदीप्तानुक्रदिष्यत स
मित्यादिरर्थः सचउस्त्रादीशादानांतत्सदृशापरत्वेइवशब्दस्यवतात्पर्यग्राहकत्वेसत्ये
वलभ्यते अप्रत्ययाप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकतापिभज्येतइवशब्दानुत्पत्ती
यादुर्लभा अस्वार्थकतयाकारकविभक्त्यायोगात् एवमप्युस्त्रादिष्वत्तृतीयायाअ
नन्वयस्यानुभवाच्च नन्वेवंनञतत्पुरुषस्योत्तरपदार्थप्राधान्यमित्यादिस्थिक्रांता
भज्येतन्नितिचेन्न पूर्वपदद्योत्यंप्रति प्राधान्यमिति तदर्थात् घोत्यार्थे नैवार्थव

नामिदमनुशासनंतत्वर्थानामितिअर्थंनिवृत्तिपरंवाक्यंनतुकर्तृविशेषनिवृत्तिपरं अतोनास्तु
भयप्राप्तिः अस्तुवायथाकथंचिदुभयप्राप्तिः तथापिनक्षतिः उभयप्राप्ताविितिसूत्रेअविशेषेण
विभाषेतिपक्षस्यवक्ष्यमाणत्वान्नियमा प्रवृत्तिपक्षेआचार्यस्यशब्दानुशासनमितिप्र
योगसंभवात् शेषंलक्षणम्बद्धीतिवास्तु तस्माद्वैदिकालौकिकाश्चसाधवःशब्दाइहविषयइ
तिस्थितं वेदेभवाः वैदिकाः अध्यास्मादिसाधुत्व एवंलोकेभवालौकिकाः यद्वा लोकेविदिता
लौकिकाः तत्रविदितइत्यनुवर्त्तमानेलोकसर्वलोकाट्ठञ्प्राप्तिसार्वेयाख्यिवतवैदिकेकद
शमात्रमिहविषयः भवांव्याकरणान्तरेष्विवछान्दसपाद्द्वित्यागइतिसूचयितुमुभयोपा
दानं इतिविषयनिरूपणं स्यादेतत् गौरित्यादौशब्दः इहविषयः तत्रचेगकारऔकारवि
विसर्गाश्चघटकः सुत्पाद्यते तेडोप्रत्ययश्चप्रत्ययवोदिशो [illegible] दिकं नचेतऔरीतिवाधेमा
ने सत्तेनथाचाथान्तरतागौरीत्यत्रैवस्मिन्प्रविष्टितेनसहडोप्रभृतिनांसंबंधाविशेषस्तोतिपत्त्य
र्थ

शा॰ कौ॰ पयोऽग्नितान्वास्तिइतिनच्युत्पादनमिति चेन्न शक्यांतरव्यावृत्तस्यसंबंधस्यउपयो
गस्यचदुर्वचत्वात् द्रव्यगुणादितिपदार्थानामिहव्युत्पाद्यतायत्तेष्व अनितिहितेषांगो
४ रित्येतेवाच्यवाचकभावः संबंधः अतएवशाब्दबोधेगविसमवायेनगोत्वमिवशा
ब्दत्वस्यसंबंधेनशाब्देविशेषणतयाभासते चाक्षुषबोधेपिद्रव्यत्वास्माद्दितः शाब्दो
विशेषणमित्यभ्युपगमः आहच नसोस्तिप्रत्ययोलोके यः शब्दानुगमादृते अ
नुविद्धमिवज्ञानंसर्वंशब्देनभासते ग्राह्यत्वंग्राहकत्वंच द्वेशक्तीतेजसोयथा तथै
वसर्वशब्दानामेतेपृथगवस्थिते इतियत्संज्ञास्मरणं तन्नतदप्यत्रहेतुकंपिंड
एवहि दृष्टःसतसंज्ञाम्भावयितुंक्षमइतिच अतोचैतत् गृहीतशक्तिकेपुनिशा
ब्देनार्थस्यैवअर्थेनशब्दस्यापिस्मरणेवाधकाभावात् अतएवगोत्वस्येवगो

शब्दस्यापि व्यक्तिविशेषणत्वाविशेषात् संसर्गोऽपि तादात्म्यमेवास्तु एवं गोगुणादिष्वपि तदभिन्नाभि
धेयस्य तदभेदादित्याशयेनाह गौरित्यत्र वा । शब्द इति प्रघट्टके द्रव्यगुणकर्मसामान्यैः सह शब्दस्याभेदो
भाष्यकृद्दिशा शंकानिराकृतः तत्र निराकरणग्रंथस्यायमाशयः समसत्ताकयोर्भेदाभेदौ विरुद्धावेव अस
रव पात्वदुक्तरीत्या सत्तागुणत्वाद्यभेदात् सुखदुःखस्वर्गनरकादेरप्यभेदापत्तेः प्रवृत्तिनिवृत्तिव्यवस्था
न स्यात् तस्माद्भेदग्रहाद्भ्रमनिवृत्तिः जातिव्यक्त्यादिसंबंधस्त्वविशिष्ट एवेति एवमेव शब्देनापि सत्ता
स्येव संबंधो द्रव्यादीनामिति स्थिते प्रसिद्धं च द्रव्यादिषु सत्त्वादेरस्य प्रकृते उपयोगोऽपि अस्मिन्नर्थे
अयं साधुरित्यर्थविशेषसंपर्कस्यैव साधुत्वप्रयोजकत्वात् अत एव वाजिनु दधि द्रुं चक्रमेण
अश्वघासादौ अश्वशब्दस्य साधुर्युक्तेमेणत्वसाधुरिति सिद्धांत ननु पदावैशेषिकाणामेत
च्छास्त्रसिद्धमेव प्रकृतिप्रत्ययादिविभागमनुजीव्य पदार्थव्युत्पादनाय प्रवृत्तिः प्रकृतिप्रत्य
यादिविचारस्तु कांश्चित्कः प्रासंगिकः तथैवहापि लोकप्रसिद्धं दर्शनांतरसिद्धं च पदार्थजा

प. कौ. तस्युपजीव्यस्य ह्रस्वमात्रव्युत्पादनं न विरुध्यते इति चेत् अस्तु नाम एवं तथापि पुं प्रवृत्तिव्यु
त्पादनं निष्फलमेवेति चेत् अत्रोच्यते ओऽस्ति इति देवदत्तः पचतीत्यादयः शब्दा ग्राहिक
५ याता वज्रोन्मसहस्रेणापि बोधयितुं वोढुं चाशक्याः अनंतत्वात् अतः प्रकृतिप्रत्ययविभा
गकल्पनारूपो लघुभूतः उपायः समाश्रीयते लिपिवत् आरोपित एव वस्तुत्र संबंधः प्रसि
द्धो हि स्थूलारुंधतिशाखाचन्द्रादिन्यायो लोके यथैव केशवात र ए न्यायश्चोत्तरमीमां
सायां तात्पर्यविषयावाधाच्च प्रामाण्यं एवैव वाद्यर्थवादस्यापि गतिः आत्मवधो वेदन
ता प्रभृतीनां वाधेपि तात्पर्यविषयीभूतस्य प्राशस्त्यस्यावाधितत्वात् उक्तं च हरिणा उपा
याः शिक्षमाणानां बालानामुपलालनाः असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते
इति उपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिता इति च अत एव हि केचित्प्रत्ययं विधाति अ चि
रीत्या प्रकृतिं तथा सूत्रे पाठितमित्यत्र इतप्रत्ययः भाष्यरीत्या तप्रत्ययः सूत्ररीत्या तावाति

तिवनुपडावनावर्ण्यवैशेष्यादितिवार्त्तिकोक्तेरित्याडावनुदितिदिक् एतेन पचतीत्यादे
लजा श्चादेशैः स्मार्यमाणाँद्येयो बोधका इति वदंत परास्ताः तथाहि वृद्धव्यवहाराद्व्युत्पत्तिग्रह
इति निर्विवादं ततश्च प्रयोगसमवायिनामेव तिप्रभृतीनां शक्तिः सिद्ध्यति न तु लौ
३ किकानां लादीनां एवं डुपचष्पाकेत्यादौ प्रकृतयो विचक्षिवादिप्रत्ययाश्च न शक्ताः
किं तु अपाक्षीत्पपाच पाप च्यते करोति चकार चर्करीतीत्यादिप्रयोगसमवायिनः अ
पाक्षपपाच इत्यादय एव स्मर्यमाणेन डुपचष्प्रभृतीनां स्मरणं तेनार्थबोध इति चेन्न ला
घवाघवस्थितत्वात् स्मर्यमाणानामेवार्थसंबंधकल्पनात् श्रोत्रप्रत्यक्षिकस्य स्मरणादे
स्यनेगौरवाद्व्यवस्थापत्तेश्च पचति देवदत्तः पचंतं पश्येति तिपृश्चा तत्रापि स्मारितत
स्य लट एव यत्नो बोधकत्वे एकत्राधाराधेयभावेन संसर्गे एव देवदत्तेऽग्रभव्यातात्पोपलो

रा०कौ०व विशेषणं इत्यत्र तु अभेदेन संसर्गो कृदर्थः कर्त्ता विशेषणमिति वहिर्जातं भंगापत्तेश्च ॥
ण तेन कर्त्रधिकरणे आख्यातार्थसंकेते लिंगस्य जं जन्यमानाधिकरणे ज्ञानजन्यत्वं स्वी
मां ८८ कुर्वन् नामीशाका अपि परास्ताः तत्र तु तैः कृत्वे ज्ञानजं श्लोक तर्हि कृदिति व्याकरणं ज्ञानिया
हेकमस्तीति तदप्यापाततः कृदकपशेषायमसि द्विष्टा पेषु एवलादिषु पतिष्ठते न तु
शत्रादिषु स्थानस्यैन तिराकांक्षत्वादिति वक्ष्यमाणत्वात् आकांक्षितविधानं न्याय इ
ति न्यायात् अन्यथा क्रियमाण इति कर्म्मणि ज्ञानचोदितो लभ्यापत्तेश्च किंच कर्त्तरि कृ
दिति यत्कर्तृग्रहणं तदेवलः कर्म्मणीत्यत्राप्यनुवर्त्तते तत्कथं कृतांति हं च वैलक्षण्यं
अन्यलभ्यत्वादेरुभयोर्यत्नसाम्यात् नामार्थयोरभेद एव संसर्ग इति हि ज्ञानजा
दौ कर्त्रीवाच्य इत्युक्तं तत्र पचति कल्पं पचति रूपं देवदत्त इत्यादौ घनरोधातिङः क्वपि

तुल्यं तस्मात्सरीत्या न कश्चिद्व्यत्ययं तातिङः तेवैषम्य हेतुः अस्म द्रीत्यानुभाव प्रधानमाख्या
नि तं सत्वप्रधानानि नामानीति निरुक्तकारोक्तेः प्रत्ययार्थप्रधानात्प्रभोत्सर्गिकं तिङः क्षुत्यज्य
त्वा प्रधान प्रत्ययार्थवचनमर्थस्याप्य प्रमाणं दितिसूत्रा स्वेशात् शानज्विधौ रूपाद्विधौ
वभाष्येपि स्फुटमेतत् पाचको व्रजतीति वत्पचति व्रजतीति प्रयोगोप्युत एव नापाद्यते
पचतिभवतीत्यादिवो पपद्यते पचतो रूपं पचंति रूपमित्यादो रूपवाद्यते द्विवचनादिव
भवति तस्मात्तिङः शुद्धस्त्वचा विप्रत्यया विशेषानुभावव्यत्यासमानेमस्तीति वक्ष्यते यत्तुभ
देकांतं कर्त्रे दियदकेत्तं तत्र ति विवृति लादिविधेद्ध्येकयोरित्यादेश्च रूपवाच्यतयाव्याख्याना
त्कर्तृ वा [illegible] व्यतास्त्वादायातीति तद्व्यापाततः द्विवचनादिसंज्ञाद्यादेशानिष्ठा
तनश्च तद्विधिनाद्व्येकयोरित्यस्य एकवाच्यताया तत्र कर्त्रेरीत्यस्तियाद्वि त्वादि विशेष

वैकवाक्यतास्मान्तु पदैकवाक्यता आदेशविधेर्लविधेश्च लस्य लकारानुवादेन प्रवृत्तेः लविधौ तु कर्त्तृग्रहणं
द्विवचनादि संज्ञाश्रुतिः।
शा० को० एतया कथंचिद्विधेज्येत लविधिरिति वादिविध्यादेः प्यकर्तृत्वमिति चेत् सत्यं वादिनि मुक्त एव स्ती
अत एवादेशस्थानिताल्लकारो बोधक इति पक्षे एकत्वादिभानोपपादनाय आदेशानामेव कर्त्तव्याः व
७ एवं णलादौ तिबादिद्वारकं लिडादिस्मरणं कल्प्यमिति महद्गौरवं न च परंपरासंबंधे
न णलेर्व्वबोधकः शक्तिसंबन्धत्वात् अत एवापभ्रंशानां साधुस्मारकताभ्युपगमस्तावा
वै पीति दिक् तस्मात् न्नासिद्धमित्यादौ यथा आचार्यैरपि णव्याख्यानं सर्वसंमतं तथा
सु शास्त्रीयप्रक्रियायां सर्वत्र वस्तुतो वाचकता स्फोटे कनिष्ठा तत्र चाष्टौ पक्षाः वर्णस्फोटः
पदस्फोट वाक्यस्फोट अखण्डपदस्फोटः तादृग्वाक्यस्फोट इत्थं पंचव्यक्तिस्फोटाः
वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोट इति तथा हि किंचिद्वर्णव्यत्यासादिना भ्रा
न्तवच्छेदकानुपूर्वीभंगस्य प्रतिपदमौत्सर्गिकता तत्रैव केनचित्के विपर्यासे धार्मि

ग्रहालेनकस्यस्य [illegible] णमित्यत्रविनिगमनाविरहाद्दृष्टमोद्धृष्टमोद्धृष्ट इत्यादा
विवकरकारखक्कर इत्यादीनांप्रयोगसमवापिनांसर्वेषामेव वर्णानांतत्तदानुपूर्व्यवछि
८ न्नानांवाचकतेतिवर्णस्फोटपक्षः कुम्भप्रभृतयोवाचकानवेतिचेहविप्रतिपत्तिश्चेदिंरामं
रामेणरामापहरयेहरौहरा [illegible] ति त्यादीपरिनिष्ठितंपदमेववाक्रियानंश्लोदृव्यादिवाच
कः किंयांश्वकर्मत्वादेरित्यस्यविनिगंतुमशक्यतयारामं इत्यादि परिनिष्ठिपदमेववा
चकंकर्मत्वादिविशिष्टस्येतिपदस्फोटपक्षः २ दधीदं हरेवावि स्मोवेत्यादावपिविनि
गमनाविरहतोत्माद्वाक्यमेवविशिष्टार्थशक्तमितिवाक्यस्फोटपक्षः ३ एकः पदइतिवद
कंपदंवाक्यंवेत्यबाधितप्रतीतेर्वर्णातिरिक्तमेवपदंवाक्यंवा [illegible] ऽप्रसवं हं वर्णव्यंग्यमेकत्वप्र
तीतिरौपाधिकीतिचेत्प्रटपितथात्वापत्तेः कःपदार्थोस्माविति चेत् भावः भावविशेषु ब

शा॰ को॰ कांतर्भवतीतिचेत् त्वत्सरिभाषितेषु ङ्क्यादिषु मांतर्भूत नैतावता प्रमाणसिद्धं प्रत्याख्या
तुं शक्यते ऽपनियतपदार्थवादे गौरवमितिचेत् व्यक्तीयत्तातवापि नास्ति उपाधीयत्तानुस
भावत्वा वैः सुवचाभावत्वा स्यांनि सत्वानि सत्वा स्यांवाविभजनात् । भावविभाजकोपाधयस्तु घ
टविभाजकोपाधिवद्दनावश्यकाः ऽपसिंक्ष्मपक्षे ऽपवर्णा ऽपि ऽपनावश्यकाः । नन
नुभवसिद्धात्व इति चेत्तन्न व्यंजकध्वनिविशेषोपहितः स्फोटएव गकाररू घात्मनाव्यव
ह्रीयतेइत्यभ्युपगमात् गादमनेत्ताशामंदोगकारइति चेत् ऽद्वैतसिद्धांतेविषयसंबंधज प
न्यव त्तिवैचित्र्येणाव्यंग्ये स्वरूपसुरेववैचित्र्यवक्ष्ये ऽप्रतएवत्वाचस्पातिमिश्राः तत्वविंदे
वस्तुतः ककारा द तिङ्मिच्यमाने मूर्तेगकारस्याभावादितिस्फोटवादमुपन्यास्यमरुपया
वा ऽप्रत्वंहेष्वपि रूकारादिवर्णेषु वर्णांतरसमानाकारैकदेशावभास तथा ऽप

सेवर्णाद्यभासोपि भविष्यति उक्तंच वोपदेवेन शक्तत्वं इव शक्तत्वे जाते लोपवमी
क्ष्यतां औपाधिको वा भेदोस्तु वर्णानां तारमंद्रवत् इति भर्तृहरिरप्याह पदे न वर्णा विद्यंते द
वर्णेष्ववयवा न च वाक्यात् पदानामत्यंतं प्रविवेको न कश्चनेति तस्मादखंडं पदं
वाक्यं वेति पक्षद्वयेपि व्यक्तिस्फोटावांतरभेदाः ५ जातिस्फोटवादिनस्तु स्फोटो नतरद्वर्णोकंशा दि
श्री कैक्तावच्छेदकतयोध्यपक्षत्रयेपि यथाययं वाच्यमु अन्यथा सरो रस इत्यादाव
र्थविशेषप्रतीत्यनापत्ते तच्च उपाधिरूपं उपाधिश्च परंपरासंबंधो जातिरेव सा
च सर्वाधिष्ठान ब्रह्मस्वरूपात्मिका तथाच शा कांपारा इव घटाकाशोपि न्याय सामान्याक्रां
त्यधिकरणरीत्या ब्रह्मतत्त्वमेव तत्तदुपहितं वाच्यम् वाचकं च अविद्या वा अविघ
कधर्मविशेषो वा जातिरिति पक्षेतु सैव वाचिकास्तु इत्याहुः अन्ये तु अपेते पक्षाः

शा॰ कौ॰ सिद्धांतग्रंथेषु तत्र तत्रोपनिबद्धाः तथाहि स्यातिवत्सूत्रे सर्वे सर्वपदादेशा इति भा
ष्यग्रंथः पठ्यतेऽर्थोनेनेति अर्थवदिह पदं न तु सुप्तिङं तमेव तथा च एरुरित्यस्य तेस्तु
९ रित्यर्थ इति टीकाग्रंथश्च वर्णस्फोटेऽनुकूलः तथा समासमर्थोभिधानसमर्थस्यैवा
देशत्वमिति स्थानेंतरतमपरिभाषायैवेति तस्य स्थूभिपामित्यत्र सुनिर्वोढा तद्यं
यथासंख्यसूत्रं नारब्धव्यमिति भाष्यमपि पदस्फोटे वाक्यस्फोटे इहैव प्रघट्ट
के येनोच्चारितेनेति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थे तथा वर्णितो वे
र्णव्यतिरिक्तस्य पदस्य वाक्यस्य वेति वृद्धाः तयोरखंडत्वानोयुक्तानित्याः प्राहुः नि
त्येषु शास्त्रेषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति तत्र तत्र भाष्येऽखंडतोक्ता
प्राया निश्चलयंत्रेषु केतवानतराशिषु अयोघने शैलशृंगे सीमांते कूटमक्षि

यामित्यमरः पस्पशायामेवप्रघट्टकांतरे किंपुनरित्यादिभाष्यमुपादायकेचिद्वर्णस्फो
टं ऽपरेपदस्फोटंवाक्यस्फोटंचाहुरितिवदताकैयटेन ऽइउण्सूत्रेत्यत्रव्यक्तिस्फोट
जातिस्फोटयोर्बलाबलंचिंतयताप्रत्याहाराह्निके तेऽप्रक्षरंनक्षरंविद्यादितिभाष्य
व्याख्यावसरेव्यवहारनित्यतातुवर्णपदवाक्यस्फोटानांनित्यत्वंतुजातिस्फोटस्येति
प्रतिपादयता ऽत्रपदमेवब्रह्मतत्त्वमेवहिशब्दस्वरूपतयाप्रतिभातीत्यर्थइतिव्याच
क्षाणेनसर्वेपक्षाःसूचिताएवयदातु ऽव्यक्तिरेवजातिरितिपक्षःतदापिप्रायेणाजाति
स्फोटस्यापिव्यवहारनित्यतेति ऽअक्षरंनक्षरंविद्यादित्यस्यकैयटोक्तेपाठांतरे ऽआ
धंतेतोटकितावदितिसूत्रेचभाष्येएववर्णस्फोटपदस्फोटावुक्तौ ऽअसत्यमेवप्रकृतिप्रत्य
यविभागांतदर्थंचाश्रित्यद्रव्यागववन्यायेनसत्यस्यपदस्फोटस्यव्युत्पादनमभिप्रेत

श०कौ० मितितत्रैव कैयटः । अर्थवदधातुः स्वं रूपं शब्दस्येत्यपरस्तत्कालस्येत्यादिसूत्रेष्व पि स्पष्टमिदं
भाष्यकैयटादावित्यलं बहुना जातेश्च ब्रह्मात्मकत्वमुक्तं हरिणा संबंधिभेदात्सत्तैव भि
१० द्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥१॥ तां प्रातिकार्थं च धात्वर्थं च प्रच पदि
क्षते सा नित्या सा महानात्मा तामाहुस्त्वतलादय इति जातेः स्फोटत्वमपि प्रकल्पिता इति पृथग्
कां तेन सत्त्वाहत्रनेकव्यक्तिभिर्व्यंग्या जातिस्फोट इति स्मृता केश्चिद्व्यक्तयो ध्वनित्वेन
प्रकल्पिता इति यच्च वीहिर्णो पक्षान्तरमुक्तं तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रंथकृतां तत्रापि जाति
स्फोट इत्यवधेयं पूर्वपूर्वोपमर्देनैवोत्तरोपन्यासात् तथा च प्रथमं व्युत्पत्तेर्व्यवहाराधीनत
या संपूर्णस्य वाक्यस्य विशिष्टार्थे प्राथमिकः शक्तिग्रह इति निर्विवादम् सर्वापोद्धारपाभा सर्व
यवानां शक्तिमिति न्यायात्स्पष्टं भेनत्यज्यते इति दर्शनांतराणां पंथाः । एकादिस्य लेऽङ्करी देशा
त्याविनिगमना विरहेण कैश्चित्यरूपादिस्थले पूर्वलोपाद्यभ्युपगमेनैव व्याकरणांतां

ल

कैहसति॰ऽवयव ॰ शास्त्रे ईरूपपादतयाप्राप्यमिकशक्तिग्रहणावप्रमारूपइतितु सैकां
तिकेः पंथाः उक्तं च हरिणा तत्रयन्मुख्यमेकेषां तत्रैतेषां विपर्यय इति ब्राह्मणार्थाय यथा ना
स्ति कश्चिद्ब्राह्मण कंबले देवदत्तादयो वा क्वेत थैव स्युरनर्थका इति च एवं स्थिते निपा
ताद्योतकाविकरणाऽस्वनर्थका इत्यादि विचारोपि प्रक्रियादशायामेव आह च प्रडा
दीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनं धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशो इति तादृ
शोऽप्रखंड इत्यर्थः एवं च नामार्थयोरभेद एव संसर्गः प्रत्ययार्थप्रधानमित्यादि
व्युत्पत्तयो प्रक्रियाश्रया एव उक्तं च किं गर्भजन्ये किं गर्भं कीदृग्भातीति नो मते
विचारः फलितः सर्वैः प्रकृति प्रत्ययाश्रयः इति आरोपितस्यापि पारमार्थिके उपायता
न विरुद्धा लिपि स्थूलारुन्धती शाखा चंद्रादीनां लौकिक दृष्टांतानां प्रथैवाद वा

ति

ब्रह्मणास्वतमितिस्थितं। आह च तदेवं वतादिकान्वेषणाय प्रवृत्तास्त्रिंतामशीतिं व्यवानिति
वाशिष्टस्मायणो ५३॥

म॰ को॰ अथ पंचकोशावतरणादीनां तत्रांतरस्थितानां पूर्वत्रासिद्धानांदी चैतत्त्वात्रासिद्धानां प्रा
गेव दर्शितत्वात् तदेवं पक्षभेदेन अविधेर्वर्णस्यैव वा स्फूटत्वे धीस्मादिति व्युत्पत्त्या स्फो
३१ ट इति स्थितं आह च शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते इति समाहारं भक्तभा
वानामनादित्वाऽऽध्यात्मिकं न्यायेन शब्दविचाराय प्रवृत्तः सन् प्रसंगादेते औपनिषदं
ब्रह्मण्यपि व्युत्पद्यतामित्यभिप्रायेण भगवान् भर्तृहरिर्विवर्तवादादिकमपि प्रस
गाद्युत्पादयत् तत्तन्नोतरस्फुटं प्रकृते नातिवोपयुक्तं चेति नेह तन्यते इति स्फो
टस्वरूपव्युत्पादनं न्यायेतान् चालिख चकार स्थितिरित्यादि व्यवहारास्तिपो वृष्ण वे
दसंभ्रमवतां तत्रैव वाचकत्वाभिमानजयावालानां प्रस्तुतं न उपपद्यन्ते यथा तथै
व भेदग्रहवतामपीति वस्तुस्थितिः एवमिहापि प्रकृत्यादिविभागे पारमार्थ्य

कल्पाभिमानवतामपि उपपद्यत एव ननस्त्वेतर्हि किमर्थं कल्पनायासानक्लेशः अत एव हि
भाष्यकारोपि शब्दो नित्योऽनित्यो वेति विकल्प उभयथापि व्याकरणारंभस्य निष्प्रत्यू
हत्वाद्यथास्थितमुदासिष्यत इति चेत् सत्यं व्युत्पत्त्यर्थं वस्तुस्थितिः कथिता पक्षभेदेषु हि गौण
मुख्येषु मुख्यत्वादितेषु तत्र तत्र परस्परविरुद्धतया भासमाना अपि सिद्धांतग्रंथा व्यवस्थाप
यितुं शक्यते स्वार्थ द्रव्यादीनां पंचानां क्रमेणाभानमित्यादि वक्ष्यमाणमपि कल्पन
यैवोपपादयितुं शक्यते इति दिक् ननस्तु साधुशब्दो विषयः अस्तु च प्रकृतिप्रत्ययादि
कल्पनया तस्य साधनोपपत्तिः तथापि व्याकरणाध्ययने स्यानुष्ठापकं किमिति चेत् नित्या
ध्ययनविधिरिति गृहाण श्रूयते हि ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्येयो ज्ञे
यश्चेति निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत् कोऽर्थस्तेन अनुष्ठाप्यते अनेनेति

श०को० कारणं फलं ब्राह्मणेन षडंगो वेदोऽध्येयो ज्ञेयश्चेत्यन्वयः। तथा च सांगवेदाध्ययनतदर्थ
ज्ञानहेयोपादेयधर्मानित्यः संध्योपासनादिवदितिसर्थः श्रुतिरेवेति हरदत्तादयः स्मृतिरितितु
१२ति भट्टाचार्याः तत्र यदि स्मृतिरेवेंद्रा माणिकं तर्हि आगमः स्वल्पं च पीति माघे प्यागममूल
कत्वादागमः स्मृतिरेवेति व्याख्येयं अंगत्वं चांगत्वेन संस्तवात उक्तं हि शिक्षायां मु
खं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते निरुक्तं श्रोत्रमुद्दिष्टं छंदसां विचितिः पदे शि
क्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते इति उपकारकत्वप्राप्यंगत्वं व्याकरणं हि स्व
र्थविशेषमाश्रित्य स्वरविशेषादीनीदधत् पदार्थविशेषनिर्णये उपयुज्यते
ज्योतिषमपि स्वाध्यायोपयोगिन मनुष्ठानोपयोगितं च कालविशेषं प्रति
पादयति निरुक्तं तु व्याकरणस्यैव परिशिष्टप्रायं बाहुलकादि स्वाध्यायानां लो

पागमविकारादीनां प्रायशस्तत्र संग्रहात् छंदोविचितिरपि गायत्र्यादिलक्षणद्वारा गायत्र्या
यजतीत्यादिविध्यर्थनिर्णये उपयुज्यते। शिक्षापि वर्णोच्चारणप्रकारं दर्शयति कल्प
सूत्राण्यपि प्रकरणांतरपठितस्य न्यायलभ्यस्य शाखांतराधीतस्य चांगजातस्योपसं
हारेण प्रयोगं दर्शयंति तस्मात् षडप्यंगानि तेष्वपि प्रधानं व्याकरणं पदपदार्था
वगमस्य व्याकरणाधीनत्वात् वाक्यार्थज्ञानस्य तन्मूलकत्वात् अत एव तस्य शिक्षा
यां मुखत्वेन निरूपणं कृतं मन्वादिस्मृतिष्वपि अंगाध्ययनविधयः प्रसिद्धा एव
स्वाध्यायविधिरि त्यर्थः ६ तथा चाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितं तथा च संध्योपा
सनादेरभावे प्रत्यवायो नुष्ठाने च पापक्षय इति यथा प्रतीयते तथा व्याकरणाध्य

प्रा० कौ० यत्नस्यापि अननुष्ठाने अनुष्ठाने च बोध्यं रक्षा प्रभृतीनि फलांतराण्यपि संति तथा च भाष्यं
कानि पुनरस्य प्रयोजनानि रक्षोहागमलघ्वसंदेहाः प्रयोजनमिति अत्र प्रयुज्यते प्रवर्त्यते अने
१३ नेति करणे ल्युडंतः प्रयोजयतीति कर्त्तरि ल्युतत्या बाहुलकात् कर्त्तरि ल्युडंतो वा उभयथा प्र
वर्त्तकविधिपरः पुल्लिंगः प्रयोजनशब्दः एकः फलपरः क्लीबोपरः उभयोर्नपुंसकमनपुं
सकेनेति नपुंसके केशेषेणैकवद्भावस्य वैकल्पिकत्तया प्रश्ने बहुवचनं उत्तरे एकवचनं
च बोध्यं तत्र आगमः प्रवर्त्तकः रक्षोहलाघवासंदेहास्तु फलानीति विवेकः तत्र प्रवर्त्तक २४
आगमो व्याख्यातः फलानि व्याख्यायंते तत्र रक्षा वेदसंरक्षणं तथा हि भाषायामदृष्टा
लोपागमवर्णविकाराश्छंदसि दृश्यंते ते केवलप्रयोगशरणैः प्रमादिकाः संभाव्येरन् नु
वैयाकरणस्तु लक्षणादर्शितेदेवरूपं स्थापयति तत्र लोपोदाहरणं । स्तनादेवेषु विवि

तत्र प्रयोगदर्शी

देमितद्रू: आत्मना आत्मनेत्यर्थः मंत्रो ह्या ड्या देवात्मैं इत्याकारलोपः आगमो यथा दे न
वासः ब्राह्मणासः आज्जसेरसुगित्यसुगागमः लोपागमौ यथा देवा अदुह अदुह
तेत्यर्थः दुहेर्लङो रुट्स्यादादेशोक्ते लोपस्त आत्मनेपदेष्विति तकारलोपः वृहल्लं
छंदसीति रुडागमः एतेन नाभिः दुह विष्वादत्तेधेनवो दुदुह इत्यादि लङंतमपि
व्याख्यातं वर्णविकारो यथा गृभ्णामिति सौभ गलोपः ह ग्रहोर्भश्छंदसीति हस्येति
वक्तव्यमिति भकारः प्रत्ययोपि छांदसोस्ति यथा उज्जभं च निग्राभं चेति उदिग्रह
इति सूत्रे उदग्राभनिग्राभौ च छंदसि स्रुगुद्यमननिपातनयोरिति वचनादुन्नि
पूर्वाद्ग्रहेर्घञ् तत्रोत्पूर्वात्सूत्रेण लोकेपि सिद्धो घञ् निपूर्वात्तु वार्त्तिकोक्ते छंद
स्येव संतिविषमो विशेषयुक्तोः पात्र विशेषाः सुचः इहतेजहूप भृतो स्रवग्रहणं

श्रा॰ कौ॰ उदग्याम्यं चेति जुहूमुपघ्नतीति निग्राभ्यं चेत्युपस्तंनियच्छतीति वचनात् मकारा
देशः प्रागवत् जहोपि प्रयोजनं तथाहि यत्राङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः यथा
१४. दर्शपूर्णमासे यत्र नोपदिष्टं सा विकृतिः यथा सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इति
विहितो यागः तत्र विकृतस्य विधेर्विषयभूतायां भावनायां करणीभूते यागे उपकारा
कांक्षायां तन्मुखेन प्राकृतमंगजातं प्राप्यते वैदिके कर्मणि तादृशानामेवांगानामपेक्षितु ते
त्वात् तस्मात्प्रकृतिवद्विकृतिः कर्तव्येति पूर्वमीमांसायां स्थितं तत्र यस्यांगस्य प्रकृतौ
य [redacted] उपकारः क्लृप्तः तस्य विकृतावसं
भवेति वृत्तिः मंत्राश्च प्रयोगं तेषां चानुष्ठेयार्थप्रकाशनं कार्यं तत्र प्रकृतौ यस्य मंत्रस्य
पदमभिधेयं तच्चेद्विकृतौ साकल्येन नास्ति तदा कृत्स्नस्य मंत्रस्य निवृत्तिः यथा अ

तेषामेव प्रकृतौ क्लृप्तसामर्थ्यला
तद्धिशेषस्यैकदेवत्वात् ते
दिताशक्यत्वात् ६

५ वरूक्षोदिवः सर्लंवध्यासमित्यव[redacted] यातमंत्रस्यक्कस्लैलेषु यस्यलेकदेशास्या
भिधेयंनास्तितस्यतावन्मात्रंनिवर्त्यते यथा अग्नयेत्वाजुष्टंनिर्वपामीत्यस्यमंत्रस्यावृय
वभूतंदेवताभिधायिपदं औषधद्रव्यकत्वेन एकदेवताकत्वेन वाग्रेयविकारभूतेसौर्येनि
र्वर्त्तते अपिशब्देनचलुप्तकारकत्तयानिवर्त्तमाने एकारोपिनिवर्त्तते अकारांतेतरप्रके
तिसंनिधानेनैवहि एकारस्यसंप्रदानवाच्यम् अकारांतत्तु यशब्दस्यततष्वाच्यंतं सूर्या
येत्याद्युदात्त अग्नयइत्यस्यमध्योदात्तस्यस्थाने ऊह्यंसोयंप्रकृत्यूहः लिंगस्यक्कचिदूहः
यथादेवीरापःशुद्धाःस्थेत्यसप्सुविनियुक्तो मंत्रः तस्याज्येऊहः देवाज्यशुद्धमसीतिप्रत्येय
मात्रस्य क्कचिदूहः यथा मामेभ्रोसंविकथाइतिपुरोडासेऽवदानमंत्रः तस्यधानासूहः
मामेष्टमासंविजिध्वमित्यादीतिहरदत्तादयः याज्ञिकास्तुसंविग्ध्वमित्यूहमाहुः

शा॰ कौ॰ युक्तंचैतत् पक्षेतावत्सिद्धतयाविजरपृथग्भावेइत्यस्यप्रयोगोनतुअप्रोविजीमयचलन
योरित्यस्येत्यवधारणात् लाघवमपिप्रयोजनं तथाहि अध्यापनंब्राह्मणस्यवृत्तिः
३५ तन्निर्वाहश्चवैदुष्याधीनः वैदुष्यंचसाध्वसाधुविवेकः सचनप्रतिपदपाठादिना
संभवति शब्दानामानंत्यात् तस्मादुत्सर्गापवादरूपलक्षणद्वारातद्बोधनेलाघवं
अन्यथातुगौरवम् असंदेहोपिप्रयोजनं तथाहि स्थूलपृषतीमनड्वाहीमालभेते
तिश्रूयते तत्रसंदेहः कर्मधारयोयंवहुव्रीहिर्वेति तत्रकर्मधारयपक्षेपृषतीश
ब्देनमत्वर्थलक्षणयापृषत्वतीविंदुमतीगौरवाभिधीयते स्थूलापिशेवाविंदूनां
तुस्थौल्यंतानवंवायथातथास्तु वहुव्रीहौतुस्थौल्यंपृषत्स्वन्वेति गौस्तुस्थूलाकृ
शावेत्यत्रनादरः तत्रलकाराकारेउदात्तत्वं द्वन्द्वापूर्वपदप्रकृतिस्वरेणवैपाक

ति रणो वहुव्रीहिंनिश्चिनोति तत्र निश्चयेन प्रतिवंधात्संशयानस्यादः सएवासंदेहः अ
र्थाभावेव्ययीभावादसंदेहमितिस्यादितिचेन्नपर्यायेणाव्ययीभावतत्पुरुषसंज्ञे द्व
यमपीह भवतीति द्वितीये उपपादयिष्यमाणत्वात् अत एवोभयथा मुनिप्रयोगः अ
दुत्तायामसंहितमिति अव्ययासंहितयेति च एवमि दूयीतस्योपहतस्यापहृतो भक्षयामी
त्यादावपि स्वरेणैव वहुव्रीहिनिर्णये इन्द्रपीताधिकरणे अवैयाकरणास्त्वेतिसार्थकं क
त्वाचिंतास्यायेनवानेयमिति दिक् तदेवं मुक्षोहलाघवासंदेहसुव्यानिचत्वादिफला
ता निव्याख्यानि अगेमस्तुप्रवर्त्तेकहत्युक्तं भाष्ये तु संदर्भेण अर्थे फले चतुष्टयस्य प्राक्प्रख्या
वाप्रवर्त्तकेवक्तुं मध्ये तदुक्ताफलसंदर्शेन नित्यानामपि फलपर्यवसानमस्ती
तिसूचितं फलं तु पापक्षयः प्रत्यवायानुत्पत्तिर्वा धर्मेणपापमपनुदतिविहितस्यानकु

हेऽलय हेलयः वक्तमे २

श०कौ० ज्ञानान्निंदितस्य च सेवनात् अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीत्यादिवचनानी
हसाधकानीति दिक् इमानि च भूय इत्यादिना भाष्येण प्रवर्तकवचनां तथाहि उदाहृत्य
३६ व्याख्यातानी तद्यथा तेऽसुरा हेलयो हेलय इति कुर्वंतः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेछि
तवै नापभाषितवै म्लेछो ह वा एष यदपशब्द इति ब्राह्मणं अत्र न म्लेछितवा इत्यस्य वि
वरणं नापभाषितवै इति उभयत्रापि कृत्यार्थे तवैकेनकेन्यत्वन इति तवेप्रत्ययः धा
तूनामनेकार्थतया निन्दावचनान्म्लेछधातोः कर्मणि घञ् तेनापशब्दसामानाधिक
रण्यं न विरुध्यते अत्र न म्लेछितव्यमिति निषेधस्य तेऽसुरा इत्यादिरर्थवादः ननु
हविर्भिर्यजेतन्यायेन अर्थवादिकं फलमस्ति तिवाच्यम् द्रव्यसंस्कारकर्मसु परार्थत्वात्फल
श्रुतिरर्थवादः स्यादिति न्यायेन अपापश्लोकश्रवणवत्प्रशस्त्यमात्रपरत्वात् प्रकरण ए

क्तंगेहयंतिषेधइतिपर्वाणस्तर्वाणोनामेत्यादावुत्तरग्रंथेभाष्यकारैरेवस्फुटीकरि
ष्यते अतएवइहापिपराभूतामाभूमेत्ययंव्याकरणमितिनोपसंहृतंकिंतुम्लेछा
माभूमेत्येवम्लेछानिंघाशास्त्रबोधितविपरीतानुष्ठानादिति भावः अत्रहेहेप्रयो
गेहेहयोरितिप्लुतेप्लुतत्वप्रयुक्तेप्रकृतिभावेचकर्त्तव्येतदकरणंम्लेछनमित्येके नतु
सर्वेप्लुतःसाहसमनिछताविभाषाकर्त्तव्याइतिभाष्यकृतावक्ष्यमाणत्वान्नैषदोषइ
तिचेत् सत्यं अतएवापरितेषामादावस्यद्विर्वचनंम्लेछनमित्यपरे व्याख्यातं स
र्वस्यद्वेइत्यत्रपदग्रहणस्यचोदितत्वादितितेषांभावः तन्नेदंशास्त्रीयंद्विर्वचनं किं
तुतात्पर्यद्योतनार्थमैछिकःपुनःप्रयोगः अनावृत्तिःशब्दादनावृत्तिःशब्दादिति
चेत् तर्ह्याम्रेडितस्वरानुपपत्तिः यदितु तत्राम्रेडितस्वरविनिर्देशकएवपाठस्त

शा॰ कौ॰ हीरिश्चाद्रेफस्य लत्वमपशब्द इत्यवधेयं इदं च भाष्यादिषु प्रसिद्धं स्मृतिपाठमनुसृत्य स
माख्यातं ॰ प्रपंच [redacted] पाठः कश्चिच्छाखायामन्वेषणीयः भाष्यंदितानोघातपद्यत्रास्ये
१७ णे तु हेलयो हेलय इति वदंत इति पठित्वा तस्माद्ब्राह्मणेन म्लेच्छितवै इति पठ्यते। तत्र यका
रस्य स्थाने वकारोऽपशब्द इति स्पष्टमेवात पश्चाच्छिक्षायामुपपद्यते॥ मंत्रो हीनः स्वरतो वर्ण
तो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपरा
धादिति। स्वरेण स्वरतः हीयमानया प्रयोगादिति तत्सिः॥ मिथ्याप्रयुक्तो यदर्थं प्रतिपाद
नाय प्रयु क्तस्ततोऽर्थान्तरं स्वरवर्णबोधात् प्रतिपादयन्॥ अत एव तमर्थं नाहेत्यर्थः।
वाग्ववज्रो हिंसकत्वात्॥ यजमानं हिनस्तीति यथाध्वर्युकृताज्ञोमाद्यजमाने धर्मोत्पत्तिः।
एवमध्वर्युकृताद्दुष्टशब्दप्रयोगाद्यजमाने प्रत्यवाय इत्यर्थः॥ यथेत्युदाहरणं॥ इन्द्रशत्रुः इ
न्द्रशत्रुशब्दः पुरा किल विश्वरूपाख्ये त्वष्टुः पुत्रे इन्द्रेण हते सति कुपितस्त्वष्टा इन्द्रस्य हन्ता।

रं हत्वा स्वं पुत्रान्तरमुत्पिपादयिषुरभिचारिकं यागं कृतवान्॥ तत्र वृत्रेन्द्रस्य शातयिता भवतु॥ हिंस
कइति यावत्॥ तथाभूतः सन् वर्द्धस्वेति प्रतिपादयितुं इन्द्रशत्रुर्वर्द्धस्वेति प्रयुक्तं॥ एवं नाच्छ दे
षेणाऽऽद्विकः॥ अनुप्रत्ययः प्रज्ञादिगणे निपातनाद्ध्रस्वत्वम्॥ इन्द्रशत्रुत्वस्य विधेयत्वान्न सम्बो
धनविभक्तिः॥ तस्या अनुवादविषयकत्वात्॥ अत एव राजन्नुपध्यस्व राजा भव उपध्यस्वेत्य
नयोर्व्यवस्थयैव प्रयोगः॥ जे राजन्नुपसि त्वे संबोधनवि भक्तिर्न तु विधेयत्वेऽपीति। एवं स्थि
ते इन्द्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्ते नोदात्तवक्तव्य पुमादादानुदात्तः शिलोकः॥ तथा च पूर्वपद
प्रकृति स्वरेण बहुव्रीहिस्वर्येल्लब्धः॥ इन्द्रो हि घातो शातादिके मंत्रे इत्यादिनाऽनु प्रत्यये कृते इन्द्रश
ब्द आद्युदात्तो व्युत्पादितः॥ तेनेन्द्र एवास्य हिंसकः सपन्न इति॥ अप्सु तीति हा सपुराणा द्विपूर्वमि
दम्॥ तदिहोदाहरणत्रयोक्तम्॥ स्यादेतत्॥ यत्र कुमारीत्यकस्मात्येह भवितव्यम्॥ सार्वत्सु त ३
ष बहुव्रीहौ स्वरविशिष्टेति॥ अत्राहुः॥ जपादि पर्युदासेन मन्त्रे प्रवेश करणमिति विधीयते॥ स्वरे व्या
प्रयुज्यमानश्च मन्त्रो न भवति॥ तदुक्तं दलक्षणे जैमिनिना अत्र नाम्नातेष्वमन्त्रत्वमिति॥
मे

शा. कौ. आपस्तंबस्त्वाह। अनाम्नातास्त्वमंत्रा यथा प्रवरोहनामधेयग्रहणानीति। अत एव मन्त्रो हीन
इति पाठस्य शिक्षायां प्रसिद्धत्वेपि ऊह्यमानस्यामन्त्रतया यथेन्द्रशत्रुरिति वाक्यशेषोऽसंगतः।
१८ स्यादतो मन्त्रपाठ इह शब्दमात्रपर इत्याशयेन भाष्ये दुष्टः शब्द इति पठितम्। न च स्वाहेन्द्रशत्रु
र्वर्द्धस्वेतीतिवद्पठ्यत एवेति चेत्। सत्यम्। ऊहितपदमन्त्रमूलं अनुकार्यं तदनुकरणस्य पाठेपि
अर्थपरस्यानुकार्यस्य लौकिकत्वानपायात्। नन्विन्दुपुत्रशब्दस्य लौकिकत्वेप्युक्तस्वरप्रयुक्तयोर्
गदोषयोः प्रशक्तिः स्वरस्य वेदमात्रविषयकत्वादिति चेत्। न। स्वरविधौ छन्दोधिकाराभावात्। एता
वानेव भेदः। यच्छन्दसि त्रैस्वर्यमेकश्रुतिर्वा व्यवस्थया आश्रीयते। लौकिके त्वेको विकल्प्यः। अत एव
एकश्रुत्या सूत्रपाठस्त्रैस्वर्येण वेति पक्षद्वयमपि तत्र तत्रोपन्यस्तमिति वक्ष्यामः। नन्वेवं उच्चैस्तरां
वेति सूत्राद्विकल्पानुवृत्त्यैव सिद्धौ विभाषा छन्दसीत्यत्र विभाषाग्रहणं व्यर्थं स्यात्। प्रसज्यप्रतिषेधे त
नायं दोषः। यज्ञकर्मणीत्यस्य निवृत्तये पुनर्विभाषाग्रहणात्। न च पर्युदासपक्षेप्येवमेवास्त्विति
वाच्यम्। नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतया आरम्भसामर्थ्यादेव तन्निवृत्तिसिद्धेः। प्र
सज्यप्रतिषेधे तु नारम्भसामर्थ्यम्। ऊहादिष्वमन्त्रेषु चरितार्थस्य पूर्वविधेरुत्तरेण छन्दोमात्रविष

यकेणवाधसंभवात् । नद्युहादीनां छन्दस्त्वमस्ति मन्त्रब्राह्मणात्वरत्वात् । तस्मादसमर्थसमाससमाप्ति
त्याविप्रसज्यप्रतिषेधएवागत्यास्वीकर्तुमुचितः । विन्नापर्युदासपक्षेपि मन्त्रेनित्यं ब्राह्मणेवेति विषयविभा
गसंभवेन यज्ञकर्मण्णीत्यस्यानिवृत्तये विभाषाग्रहणसंभवात् । उक्तापद्धिनोषादेवतुकेवि
ज्ञेयाद्विप्रसज्यप्रतिषेधमाश्रित्य इहाप्यकश्रुतेः प्राप्तौ सत्यां तदकरणं बहुव्रीहिस्थक
रणं चस्वरतोपराधाद्धिन्यस्यार्थइत्याहुः । श्रूयते च यदधीतमविज्ञातं निगदेनैव शब्द्य
ते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् । निगदेन पाठमात्रेण । शुष्कैध इंधनसा
न्तेन क्लीबेनएधः शब्देन अकारान्तेन वा पुंल्लिंगेन निर्वाह्यम् । न ज्वलति न प्रकाशते नि
ष्फलं भवतीत्यर्थः । निरुक्तेपि । अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा वेत्युपक्रम्य स्थाणु
रयं भारहारः किलाभूदधीत्य वेदं न जानाति योर्थं । योर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति
ज्ञानविधूतपाप्मेति मंत्रद्वयमुक्त्वा यदगृहीतमविज्ञातमित्यादिपठितम् । तत्रापिगृहीतं

शब्दतः अविज्ञानं त्वर्थतः प्रकृतिप्रत्ययादिविभागेन वेत्यादिशेषं प्राग्वत्। अन्यत्रापि श्रूयते
एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गेलोके कामधुग्भवती। एतच्छ्लोकः पूर्वपरयो
रितिसूत्रे भाष्यकृद्वक्ष्यति। एतन्मूलकमेव कात्यायनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्य
ते यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वा
ग्योगविद्दुष्यति चापशब्दैरिति। दुष्यति चापशब्दैरित्यत्र अवैयाकरणः कर्त्ता सामर्थ्या
दोध्यः। तथा अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्वि
वायमहं वदेत्। अयमहमित्यस्य स्थाने कर्मणांचानितिपरमिति गतिसंज्ञा। ततो गतिसमासे
पि अस्यवामीयमित्यादाविव तत्करणे लोदवविभक्तेर्लुक्। याज्ञिकाः पठन्ति। प्रया
जाः सविभक्तिकाः कार्या इति यद्यपि प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्य
न्ते तथापि यद्याधानादनन्तरं यजमानउदरस्य यथावानुस्पाद्यादिवासस्वसमप्ये

तस्यमहतीवियस्थानदानैमित्तिकीपुनराधेयेष्टिंविधायतत्रेदमाम्नातंप्रयाजाःसवि
भक्तिकाइति। तत्रकेवलविभक्तेःप्रयोगानुहेत्वात्प्रकृतिराक्षिप्यतेसावाग्निसहरूपान
नुयाकाश्चित्। निरुक्तेदेवताकाण्डेप्रयाजाःकिंदेवताःप्रायाजानुयाजाइतिप्रश्नमवतार्य
मंत्रवर्णोदानुदाहृत्यआग्नेयाइतिनिस्थितिरित्युपसंहृमात् तस्मादादित्तरखलुपंप्र
याजेषुवनस्पतिविभक्तयोऽग्निशब्दप्रकृतिकाःप्रम्नत्नोइत्यादिर्मीतयम्येषुदष्टव्यमु
८ तथाप्यत्रापि।योवाइमांपर्षाःस्वरसोक्षरसोवावेदधीतिसआर्त्विजीनइति।प
देपदमितिसंधिकवनाधेवीप्रायामितिशस्यःस्वरउदात्तादिःअक्षरंव्यंजनसहि
तोऽचात्रआर्त्विजमहेवा स्यार्त्विजीवायजमानःआर्त्विजमर्हतीत्यार्त्विजीनोयाजकः॥
यज्ञार्त्विगर्भ्यांखञ् आविति सूत्रेणयज्ञार्त्विग्भ्यांतत्कर्मार्हतीतिवोपसंख्यानमितिवा
र्तिकेनखञ्‌।यजनेयाजनेचाविदुषएवाधिकारइतिभावः ऋग्वेदेपिचहेवाऽवम

श्रा० कौ०

२०

अवर्णो ॥ वत्वाद्भिः गाच त्वाद्दिवौकः उक्तं च पश्यन्नु सकृत् पिबेत्याद्ययःति तदुपरि पिबनं
भवतीति भाष्यम् ॥ बालानीति तदुः प्रमानिति तु अमरस्य प्रमाद इत्येके ॥ वस्तुतस्तु त्क
भाष्यानुरोधाद् अमरग्रन्थे पुंस्त्वायोगमात्रं नूववेधं न त्वन्ययोगोपि ॥ तथा च पुन्न
पुंसकवर्गे ॥ स्याद्वास्तु हिंगुलितं तदु इति त्रिकाण्डशेषः ॥ अत एव तितउमावच्छेति तापय
तीत्यभियुक्तग्रंथा अपि संगच्छंत इति दिक् ॥ याज्ञिकाः पठन्ति आहिताग्निरुपश्र
द्धं प्रयुज्य प्रायश्चित्तीयां स्मार्तश्चेत्तीमिष्टिं निर्वपेदिति ॥ तथा दशमान्तः ॥ कालं पुत्रस्य
जातस्य नामविदध्यात् पौषवदाघ्रातं तस्यामुपवेश्य त्रिपुरुषानुक्रमेण नाम प्रतिष्ठि
तं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नामकृतं कुर्यान्नेतद्धितमिति ॥ ना
मकरणे अपि पिण्डेः पितृपैत्रयः पुरुषास्तानन्तकायति अभिधत्ते इति त्रिपुरुषानुक्रम०

अन्येषामपिदृश्यइतिदीर्घः॥त्रिपूरुषमित्यत्रपात्रादित्वात्स्त्रीत्वाभावः मूलविभुजादित्वात्कः
यत्तुउपपदाविवक्षायांआतश्चोपसर्गइतिकंकृत्वाततःषष्ठीतत्पुरुषइति तत्तुकर्मण्य
णितिसूत्रेआकारादनुपपदात्कर्मोपपदोविप्रतिषेधेनेतिवार्तिकस्यनदीसूत्रेव्याख्या
स्यतिमूलविभुजादित्वात्कइतिभाष्यस्यच अननुगुणं अतएवगंगाधरादिशब्दानांसंज्ञा
शब्दत्वमितिप्राञ्चः वस्तुतस्तुप्रथमंकर्माविवक्षायांअनुपपदत्वात्पश्चात्कर्मसंब
न्धेऽपिदोषः वार्तिकादिकंतुप्रथममेवकर्मविवक्षामभिप्रेत्य॥अन्यथाकृतपूर्व्यादि
षुकागतिः॥अतएवशाकंचेद्दुपहन्तुमितिभाष्यव्याख्यायावहिंगस्थीत्वप्रतीत्या॥अ
नरंगःपदसंस्कारोनविहन्यतइतिकैयटोऽपिवक्ष्यति विवक्षाचलोकप्रसिद्ध्यनुसा
रिणीनतुस्वार्थेनेतिविपराभ्यांजेरित्यादावपिपूर्वंधातुःसाधनेनयुज्यतइतिभाष्य

शा०को० स्तुष्वा विजयतीत्यादिनापादनीयमितिदिक्॥ तथाच ऋग्वेद एवं पठ्यते॥ सुदेवो असि
वरुणयस्यतेसप्तसिंधवः॥ अनुक्षरंति काकुदं सूर्म्यं सुषिरामिव त्रि॥ अस्यार्थः हे वरु
२१ ण सत्यं देवोऽसि यस्य ते काकुदं तालु काकुत् जिह्वा सा उच्यते उल्लिष्यतेऽस्मिन्निति काकु
दम् वदिकल्पेपणम वर्थः॥ धातूनामनेकार्थत्वात् ततोऽयमर्थः काविखानमित्यधिकर
णेकः संप्रसारणं प्राप्नोतीति सरूपे शकंध्वादित्वात् पररूपम्॥ तदप्ररणे इत्यदधिक
रणे कपृषोदरादित्वात् ज्ञुशाब्दस्य लोप इत्यन्मानि रूकस्वरसाध्यावं॥ सप्तसिंधव इव
सिंधवो विभक्तयः अनुक्षरंति तालु प्राप्य प्रकाशन्त इत्यर्थः॥ अत्र दृष्टांतः यथा
सुषिरां लोहमयी प्रतिमां प्रविश्य अग्निः प्रकाशते तथेति॥ अग्निर्हि तत्रत्यं मलं
भस्मीकृत्य प्रतिमां शुद्धां करोति तथा विभक्तयोपि शारीरं पापमपाकुर्वन्तीति

भावः सूर्मी स्थूणायः प्रतिमेत्यमरः स्मर्यन्ते यास्ते सी ज्वलनी माहिंगे नस्त्यवेगरूता
ल्पागइति । अभिपूर्वं इत्यत्र वा छन्दसीत्यनुवर्त्तेयं णिङ्कः सुषिरामि वेत्यत्रा शास्त्र
घवू अभेदोपवारोवेत्याहुः । वेमुतासु ऊषमसुषिमुष्कमे धीर इति मत्वर्थीयो सप्रत्ययः
रन्ध्रे श्वभ्रं वपासुषिरित्यमरः । रन्ध्रेसुषिरं त्रिछिन्नेवासुस्य नीतिसुषिरिति सी
र स्वामी । गर्ते गतेन्निते बाधा विरोधेसुषिरं त्रिष्विशाश्वतः । इति प्रयोजनप्रपञ्चः ॥
इत्यविषयप्रयोजनयो स्कृतेयाः सम्बन्धाधिकारिणाव कण्ठप्रायावेवेति दृष्टव्यं कौ ।
इत्ययनप्रयोजनं पृष्टं ततोऽन्यत एव तत्त्वस्य इत्यं प्रत्यवतिष्ठते । ननु यथाधीष्वेत्यावा
येणोक्तं प्रयोजनप्रसमक्षे वेदमधीयते न षडंगभूतं व्याकरणमप्यध्येष्यंते ।
त त्तिं प्रयोजनवर्णनक्लेशेनेति । अत्रेदमनन्तरमप्राधिणिदानीं तनानामलसायुष्क

शा. कौ.
२२

त्वाद्धि प्रवृत्तत्वाच्च प्रधानभूतो वेदस्तावन्मात्रेण। तदध्ययनकाले च बालाः प्रयोजनादिकं
प्रष्टुमसमर्थाः शिष्यगुरुणा उपदिश्यमानं वेदं गृह्णन्तीति युक्तम्। अतो गृहीतवेदाः प्रौ
ढिमापन्ना विवाहार्थं त्वरमाणा व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणा अपि न सहसा प्र
वर्तन्ते। वेदान्तो वैदिकाः शब्दाः सिद्धा लोकाच्च लौकिकाः अनर्थकं व्याकरणमिति च
प्रत्य[illegible]वतिष्ठन्ते। तान्प्रति युक्तमेव प्रयोजनादिवर्णनम्। पूर्वकल्पेषु तु व्याकरणशिक्षा
दीनि लक्षणानि प्रथमं पाठयित्वा [illegible] तल्लक्षणानुसन्धानपूर्वकं लक्ष्यभूतं वेदं
ग्राहयन्तः स्थिताः तदा पूर्वं बाल्यावस्थायां व्याकरणपाठात्प्रयोजनप्रश्नविरहे तत्प्रति
पादनमपि न कर्तव्यमेवेति। यद्यपि श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि यु
क्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्। ततः परन्तु छन्दांसि शुक्लेषु नियत

नः पठेत्। वेदांगानि रहस्यंच क्रमशः पक्षेषु संपठेदिति मनुवचनस्य तदूर्ध्वं मनध्यायेष्वं
गान्यधीयीतेत्यादिस्मृत्यंतराणांच पर्यालोचनया वेदवेदांगाध्ययनस्य समकालता
लभ्यते तथापि ऋषिवचनत्वाविशेषात् प्राथम्यकांक्षायामानवादेश्च ब्रीहियववद्विकल्प
एवेति तत्त्वम्। तदेवं मनुवचनव्यवस्थापयस्य सुस्थत्वात् साधुशब्दस्योत्पादनं कर्त्तव्यमिति
स्थितम्। ननु किमिदं साधुत्वम्। साधयति बोधयतीति साधुरिति चेत् अपभ्रंशस्यापि बोधकत्वे
तदिति चेन्न। गाव्यादावपि तत्सत्त्वात्। शक्तत्वं तदिति चेन्न। आपवतीत्यादौ विकरणानाम
साधुतापत्तेः। तेषामनर्थकत्वात्। इत्पूर्वपक्षलक्षित्यादीनां साधुतापत्तेश्च। लाक्षणिके-
ष्वव्याप्तेश्च। तेषामपि लक्ष्येऽर्थे शक्तिकल्पने शक्ततायां तु गौणरूपस्वरूपादिष्वतिप्रसक्तेः।
वृत्तिमत्त्वं तदिति चेन्न। हुतं के च निपातेष्वव्याप्तेः। अपसंदानिकी शक्तिरूपस्य घातनेति

वा. को. चेन्न। प्रोक्तरजित्वस्योत्तरटत्वयोरविशेषेण विनिगमनाविरहा च्छेके तापत्तो व्यास
ज्यन्नतिशक्तौ विश्रान्तेः तत्र च अपूट दिवेवना व्यवस्थापत्तिः अनवजातिविशेष एव सा
२३ धुत्वमिति वाच्यम्। कत्वादिना सङ्करापत्तेरिति। अत्राहुः। अपूनयभ्रंशानां नादियुद्धासुदय
योग्यता। व्यक्तिया व्यञ्जनीया वा जातिः। का पीठ साधुत्वमिति। अपूरस्यार्थः। शक्तिवैकल्यादि ल्प्या
प्रयुक्तमन्यथोच्चारणमपभ्रंशानां तद्विरहोऽनपभ्रंशानामेव साधुता। सा चार्थ
विशेषान्तर्भावेनैव। तथा हि। अपभ्रंशेषु शक्त्या लक्षणया वा बोधयितुं द्योतयितुं वा यादृ
रा कशब्दोनादिः प्रयु[illegible]क्तस्मिन्नर्थे दोषादन्यथात्वं यातः सोऽसाधुः। अन्यथात्वं सो
धुरिति। यिपि गाव्यादिष्वेव प्रथमं श्रुतवाः सन्तेस्मान्प्रयुञ्जते तेषामप्यन्यथोच्चा
रणमस्त्येव। तत्र च दोषप्रयोज्यतास्त्येव। मूलप्रयोक्तु भ्रमाद्यन्यतमसत्त्वात्। यद्वा।

अनादिता साधुता। अनादिमिति तु क्लीबे भावप्रधानेन निर्देशः। आदरभावो अनादिरि
ति वा। असंदेह इति क्तान्तरूपः। असंदिग्धयोग्यता वा साधुता। एतेन तत्र व ब्राह्मणपृथिवी
लेन शालिमिश्रगम्यो जातिविशेषो वा इति। यत्तु जातिसंकर इत्युक्तं तन्न। गुणगतजातौ न
सादोषत्वात्। तथाहि वस्तुवद् वदन्नादिर नोऽस्त्यावर्णे एवं पूर्वं स्मृतामत्स्यकुञ्जादि
व्यवहितस्य श्रोत्र वर्णेषु श्रुतेषु पुद्गलमानं जायते तदेव वर्णानोऽप्यु साधारणे तदनुमा
पकजात्यंगीकारे मत्स्येव व घटते। ननु तत्र व्याप्यमानाजातिस्वीकारः। श्रोत्रव
र्णत्वस्य साधारणजातेः प्राग्गृहीतत्वेनानुमितिसामग्रीवैकल्यात्। वस्तुतस्तु उपा
धिसंकरवदेव जातिसंकरोऽपि सर्वेषामस्तु। दूषकता वा जातिस्फुटतः। विनिगमकाभाव
न भूतत्वमूर्तत्वयोरिति वशीरत्वपृथिवीत्वयोर्द्वयोरपि जातित्वभंगापत्तेः स्यात समा

श०कौ० चतुर्विधमपि साधुत्वं निर्दोषं व्याकरणैकगम्यं च। एवमसाधुत्वमपि चतुर्धा। अपभ्रष्ट
तासाधिताप्रत्यवाययोग्यता तदवच्छेदकजातिविशेषो वेति। टिघुभादिसंज्ञासु यद्य
२४ पि पुण्यपापजनकतारूपे साधुत्वासाधुत्वे न स्तस्तथाप्यनपभ्रष्टत्वरूपं साधुत्व
मस्त्येव। तदेवानुशासनप्रवृत्तावुपयोगि। भस्येत्यादिसौत्रनिर्देशाल्लुक्कस्मान्नो
भवतीत्यादिभाष्याच्चेत्याहुः। एवं वा नादित्वमभ्युदययोग्यत्वं वा अनपभ्रष्टत्व
मन्त्रिणेन सिद्धान्ति किंतु पौरुषेयसंकेतविरहविशिष्टेनेत्यवधेयम्। तदुक्तं
मूयास्तताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः। कथन्नु तासां साधुत्वं नैव ताः सा
साधवो मताः। अनपभ्रंशरूपत्वान्नाप्यासामपशब्दता। हन्तत्वेच्छाय यथालोकितृषु
संकेतताद्दृशाः। ततश्च तासां प्रयोगे ऽभ्युदयः प्रत्यवायोऽपि वा भवेत्। लाघवेनाप्यवो

र्थार्थं प्रयुज्यंते तु केवलमिति तद्द्वयं निर्गलितोऽर्थः। यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते
इति पक्षेऽस्मिन्निदं प्रथमाः शब्दाः साधवः परिकीर्तिताः। त एव शक्तिवैकल्यप्रमा
दालसतादिभिः। अन्यथोच्चारिताः पुंभिरप[illegible]भ्रंशा इतीरिता इति वसाध्वसाधुलक्षणे
अप्राप्यमाणे डित्थादीनां साध्वसाधुबहिर्भावः स्पष्ट एवेति यामप्यनादित्वेति प
क्षे तु चतुर्विधा पि व्युत्पन्ना साधुता स्त्येवा उक्तं व्यवहाराय नियमः संज्ञायाः संज्ञिनि
कश्चितेति लक्षणवत्त्वसम्भवात् डित्थडित्थादिषु गवादिवत्। एतु आदीनां शास्त्रेऽस्मिन्नपभ्रंशा
व... लक्षणान्यप्रकृतिमो भिन्नस्मवन्धो विशेषणविशेष्यवादिति पक्षद्वयेऽप्यनुशा
सनविषयता निर्विवादेति। नामकरणे त्वयं विशेषः कृतं तेयोऽन्ते तद्धितमित्यादिसू
त्रसूत्राविरोधिनामेव साधुता। तद्विरोधिनां तु देशभाषाया न साधुत्वं प्रमाणानां

प्रा० कौ० वृक्षीमत्स्त्रीत्यादिनामधेयानामसाधुत्वमेवतदेतद्दूलकसूत्रैर्वार्त्तिकभाष्यावसरे स्फु
२५ टीकरिष्यते। इति साधुत्वनिर्वचनम्। व्युत्पादनं च प्रकृतिप्रत्ययादिकल्पनया उत्स
र्गापवादरूपलक्षणैरेव न तु साध्वसाध्वोर्वोऽप्रमततस्य वाप्रतिपादपाठेन। प्राच्या
नामानन्त्येन तदसंभवादित्युक्तम्। स्यादेतत्। लक्षणप्रणयनमपि किं जातिपक्ष
माश्रित्य उत व्यक्तिपक्षम्। आद्ये सकृत्तीय दाक्षिततन्दाक्षितमेवेति न सिध्येत्।
तथाहि जातिपदार्थद्वयोर्विध्योः परस्परपरिहारेण तत्तज्जात्याक्रान्तानामविवि
शेषेचरितार्थयोः क्वचिदेकत्रप्रसंगे परस्परप्रतिबन्धादप्रवृत्तिरेवस्यात्तास पत्रि ३
त्प्रतिपक्षेवृत्। तथाच वक्ष्यति। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तत्रविप्र
तिषेधसूत्रं विध्यर्थं परं तावद्भवतीति। तस्मिन्नसत्यकृते यदि पूर्वस्यनिमित्तमस्ति

तर्हिं भवत्येव तत्र । यथासिध्यकीत्यत्र भिनद्धि हिद्दिति स्थिते परत्वाद्धिभावे कृते पुनःप्र
संगविज्ञानादकुन्न भवति । तद्वज्जातिपक्षेतु पुनःप्रसंगविज्ञानं यद्यपिसिध्यति
तथापि सकृत्गतावितिनसिध्यति । तथाच जुहुतात्वमित्यत्र जुहुहिइतिस्थितेधि
भावं बाधित्वा परत्वात्तातङ्कृते स्थानिवद्भावेन स्याद्देव धिः व्यक्तिपक्षेतु सकलस्य
तुह्देष्यकस्य शास्त्रस्य प्रत्यनावेत्तवित्वाथत्वा संभवादिकः सप्रसंगे नियमार्थं सू
त्रमपूपरमेव भवति नतु पूर्वमिति तथाचैतत्सूत्रबलेन तत्र पूर्वलक्षणस्य प्राप्यत्वन
रमात्रविषयकत्वं कल्प्यतइति एतत् व्यक्तिविषयकेलक्षणभाव एव पर्यवस्यति
तथाच जुहुतात्वमित्यादेः सिद्धावपि भिंधकीत्यादि व्यक्तिपक्षे नसिध्यतीत्यस्मा
दूषाकमन्यतरपक्षाश्रयेणनलक्षणप्रणयनमितिचेत्सत्यम् । अतएव

प्रा० टी०

२१

लक्ष्यानुरोधात्सलक्षणद्वयमप्याश्रीयते कश्चित्कश्चित्सत्वार्थ इति ।। तत्र जातिवादिना
मयं भावः ।। लाघवाज्जातिर्वा व्याप्य शक्तिः आमानन्त्येन तासां वाच्यत्वे गौरवमुपाधा
हृदोहाद्यन्वयस्तु लक्षितायां व्यक्तौ इति । व्यक्तिवादिनस्त्वाहुः अनुपपत्तिं वि
नापि व्यक्तिप्रतीतिस्तु भवतु शक्तिज्ञाततया व्यक्तेरेव वाच्यत्वं प्रत्ययादिकं वि
ना जातेः प्राधान्येनाप्रतीतेश्च । वाहाद्यन्वयोऽप्येवं समञ्जसः ।। यत्तु व्यक्ती
नामानन्त्यमिति तन्न तद्बाधकत्वमुपाधावच्छेदिकाया जातेः सत्त्वात् ० नन्वेवं
जातेरपि वाच्यत्वमायातमिति चेन्न ।। प्रकार्यत्वेऽपि कार्यतावच्छेदकत्व ३९
वदशक्यत्वेऽपि शक्यतावच्छेदकत्वसंभवात् ।। अत एव लक्ष्यतावच्छेदके
लक्षणा नेति नैयायिकानामुपगमः ।। तस्माज्जातिरूपलक्षणं व्यक्तिमात्र ०५० ०१८

नुवाच्यमिति। यत्तु सरूपसूत्रे भाष्ये वक्ष्यते न ह्याकृतिपदार्थिकस्य द्रव्यं न
पदार्थ इत्यादि तेन जातिव्यक्त्योरन्यतरस्याभिमतस्यापरस्य वाच्यतेत्येवं रू
पं मतान्तरं। तथा वाक्यत्यपि करणे महत्सत्के भूानि योगेन विकल्पेन द्वयोस
ह समुच्चितासम्बन्धः समुदायो वा विशिष्टो वैकः पक्ष इति। तत्र जातिर्वा व्य
क्तिर्वा वाच्येति इहत्यमतं द्वयं तियोगेनेत्यनेनोपात्तं निर्वक्ष्यमाणं तत्पक्षत्र
णे न तु सरूपसूत्रे भाष्योक्तं मतद्वयमुपनिबद्धमिति विवेकः। यद्यपि जाति ब्यक्तिप
क्षयोरन्यतरस्य न्यायेन बाध्यत्वमवश्यं वक्तव्यं तथापीह शास्त्रे संज्ञापरिभाषा
दिवच्छेशासिद्ध्युपायतया उभयोराश्रयणे किमपि बाधकं नास्तीत्यपथे
यो वस्तुतस्तु महाभाष्यकारेणापत्तामथ्याविकल्पेनेति निष्ठितीयः पक्षोऽत्र प्रक्रिया

श॰ को॰
२

दशायामिष्यते विकल्पस्खलक्ष्यात्तु रोधाद्यवृक्षस्थितोनल्पेषष्ठिक इत्यन्ये तत्तु स
मुच्चयपक्षं चतुर्थमाश्रित्यापि कविशिलोस्यद्विवक्षा॰प्रपुरस्यत्वविवक्षेति उ
हीत्वाप्रक्रियानिर्वाहः ॥ करइतिदिक् ॥ यद्धि हि व्यक्तिरेवैत्युतस्मावैव कमभि
मतं स्यात्तर्हि जात्याख्यायामिति सूत्रं नारभेत यद्यपि जातिरेवैति तर्हि सरूपसू
त्रं नारभेतेति भाष्यं स्वानुपपत्तिरेवं न त्वनेकेऽएवाम्रवृक्षस्तत्रापि लक्षणया जाति
परत्वे इह च घ्राणाः सन्तीति प्रयोगं साधयितुं जात्याख्यायामिति सूत्रमस्तु तथा
जातिपक्षेऽपि नानार्थानुरोधा [illegible] त्सरूपसूत्रमस्तु । वृक्षा इति हि वार्ति
कप्रत्याख्येषु वक्तुं संशयमिति । सत्यम् । लक्षणानुरोधा एव पक्षद्वयाश्रयणा
गमात् अत एवाहाह तत्सूत्रयो मध्ये प्रत्याख्यानासम्भवानत्वेव्यदोषः ॥ इदा

नीवार्त्तिककारः शास्त्रस्य नियमविधित्वप्रतयासाधेच्छमाह। सिद्धे शब्दार्थ
सम्बन्धे लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः [illegible] यथा लौ
किकवैदिकेषु। लोकादेव हि प्रथममुत्पत्तिः। अभ्युत्पन्नं प्रति व्याकरणादीनामप्र
वृत्तेः। अर्थवद्धातुरित्यादिभिर्व्याकरणांशाक्तिग्रहेप्यजीवकमूतथाविसमर्थ
सूत्रवार्त्तिकं अर्थानादेशानाद्भित्ति। अनेकमन्यपदार्थे इत्यादिकं हि लोकसिद्ध
र्थमनूद्य साधुत्वान्वाख्यानपरमृतात्तस्माल्लोकादेव शब्देऽर्थेतयोः सम्बन्धे च
सिद्धेऽर्थबोधनाय शब्दप्रयोगेपि प्रसक्ते गवादय एव प्रयोक्तव्या न तु गाव्या
दय इति नियमार्थं शास्त्रं नियमफलन्तु धर्मः। तत्र स्मार्तो दृष्टान्तः प्राङ्मु
खो न्नानि भुंजीतेत्यादिलौकिकशब्दोलौकिकः व्रीहीनवहन्तीत्यादिस्तु वैदिक

प्रा०१ शब्देनोक्तः। धर्मंनियमइतिच षष्ठीतत्पुरुषः। अश्वघासादिवत्। ननुचतुर्थीतत्पुरुषः
२ प्रकृतिविकृतिभावविरहात्। ननुयदिप्रयुक्तानामिदमन्वाख्यानंतर्हिकिमर्थमप्र
युक्ताः अपिऊषतेरचक्रवैपेत्यादयोव्युत्पाद्यन्तइतिचेन्न। अर्थज्ञानंविनाऽप्रयुक्त
तायादुरवधारणत्वात्। महान्हिप्रयोगविषयः। तथाचभाष्यम्। सप्तद्वीपावसुम
तीत्रयोलोकाश्चत्वारोवेदाः सांगाः सरहस्याबहुधाभिन्नाः एकशतमध्वर्युशाखाः।
सहस्रवर्त्मासामवेदः। एकविंशतिधाबाह्वृच्यम्। नवधाथर्वणोवेदः वाकोवाक्यमि
तिहासः पुराणंवैद्यकमित्येतावान्प्रयोगस्यविषयइति। वक्तव्यानामाम्नायोवा
ह्यमाम्नायोऽगौ क्रियकयाज्ञिकबह्वृचनुगइत्यस्यप्रत्ययः। अथर्वणादधर्माम्नाय. २
योरित्युक्तत्वादाम्नायि। अथर्वणाप्रोक्तोवेदः अथर्वा। उपचारात्प्रयोगःसएवाव

सन्नादिष्वथर्वन्नाथर्वणस्तुभयोः पाठसामर्थ्यात्प्रोक्तप्रत्ययस्य वैकल्पिको
लुगिति तत्त्वम्। अत एव भाष्ये वक्ष्यते तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्तव्यः
वसिष्ठोऽनुवाकः ततो वृद्धस्य मथर्वणो वृत्तिः। तमधीते आथर्वणिकः। वसन्तादित्वा
दृक्। दाण्डिनायनादिसूत्रे निपातनाट्टिलोपाभावः। आथर्वणिकस्याम्नायः आथ
र्वणः। आथर्वणिकस्येकलोपश्चेति आथर्वणिकादण्। तत्सन्नियोगेनैकलोपश्च।
प्रकृतमनुसरामः। एतावन्तं प्रयोगविषयं पर्यालोच्य वर्षितमपथाकेऽप्युपलभ्यमानादभिले
क्षणानुगतानां प्रयोगोऽस्तीत्यनुमेयम्। अस्ति चैवमुदाहृतानामपि वेदे प्रयोगः स
मास्योरवतीरिव दूषाय नैमेन रः शुल्वं बृहस्पत्वकायत्वानष्ठकाजमतेतनूनामिति।
ननु यदि लक्षणेनानाप्तिकमिति दृश्यन्ते हि वर्तन्तीत्यादीनामसाधुत्वादिति चेन्न। [redacted]

श्रा०धा० नहि वविरत्तिपरः प्रयुज्यत इत्यभियुक्तानामविगीतव्यवहारेण सामान्यशास्त्रस्य संको
२८ कोचात् । अभ्युपगतो हि विशेषविषयिण्याप्तानितस्य कर्मानपेक्षायुः स्मृत्याग्निहोत्रा
दिश्रुतीनां संकोचः विशेषविषयेणाधिष्ठाचारेण सामान्यस्मृतेः संकोचश्चास्मात् तदुक्तम् ।
आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति । यत्र तु अप्रयोगः संदिग्धः शास्त्रानुगम
कत्तत्र निश्च यूहमनुमानम् । तदुक्तम् । यथा लक्षणमप्रयुक्ते इति । अनिश्चितप्रयो
ग इत्यर्थः निश्चितात्प्रयोगलक्षणेन प्रवर्त्तन्त एवेति निष्कर्षः नवैवं वासेण ब्रवणादि
ति निरूकल्पकप्रयोगरूपेणापि विशेषविषयकोचारेण तुवोवविरित्यादीनां सं
कोचापत्तिः । त्रिधाकाद्ययाज्ययाजनेनापि स्मृतिसंकोचापत्ते स्तुल्यत्वात् । तत्र प्र
धानुसाने नास्ति चेत् इहापि साधुत्वबुद्ध्या प्रयोगो नास्तीति तुल्यम् । एवं वाण स्त
याण इतिवदभियुक्तानामपि असाधुप्रयोगस्य कृतत्वाद् हि रूपपत्तम्यास्त्र तएव तिरेक

पुराणादिष्वपशब्दप्रयोगोपि सन्नीति हरदत्तः। नदीसंज्ञासूत्रे भाष्येपि स्पष्टमेतत्। के
चित्तु आर्षग्रन्थेष्वपि छन्दसि विहितस्य व्यत्ययस्य प्रवृत्त्या साधुतां समर्थयन्ते।
